International Journal of Sanskrit Research 2020; 6(1): 76-78

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(1): 76-78
© 2020 IJSR
www.anantaajournal.com
Received: 14-11-2019
Accepted: 18-12-2019

**मानस रंजन पति**
शोधच्छात्र, श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठम्, नई दिल्ली, भारत।

**Corresponding Author:**
**मानस रंजन पति**
शोधच्छात्र, श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विद्यापीठम्, नई दिल्ली, भारत।

# परमार्थसारे बौद्धपदार्थः

**मानस रंजन पति**

**प्रस्तावना**

सुविदितमेव यत् समस्तमपि ज्ञानं शास्त्राधीनम्। शास्त्र प्रक्रियास्मरणेनैव धर्मनियमत्वात्। अतः महर्षि पतंजलिः आह– "समानायामर्थावगतौ शास्त्रेण धर्मनियमः क्रियतः"[1] इति अपरं च भर्तृहरिणा उक्तम्–

"ऋषिणामपि यज्ज्ञानं तद्व्यागमपूर्वकम्"[2]

एवमेव महाभाष्यस्य पस्पशाह्निके– "एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति"[3] इत्यादि वाक्येन सर्वेषां शास्त्रंशरणम् प्रतिपादितमेव, तेषु शास्त्रेषु मुख्यमिदं व्याकरणमिति। "प्रधाने च कृतो यत्नः फलवान् भवती"ति।

तत्रापि व्याकरणशास्त्रीयदार्षनिकसिद्धान्तानां प्रचुरं सुस्थिरं एको भाषया स्पृहणीयो विषयेण च गभीरो महान् महनीयो ग्रन्थोऽस्ति "वैयाकरण–सिद्धान्तलघुमंजूषा।"

यद्यपि ग्रन्थे बहवः विषयाः उपनिबद्धाः सन्ति– यथा– स्फोटवादः वृत्तिस्वरूपविमर्शः, लक्षणास्वरूपविमर्शः, व्यंजनावृत्तिविचारः, शक्त्याश्रयनिरूपणम्, बौद्धार्थनिरूपणम् आदि, एतेषु बौद्धार्थः मुख्यः, अत्र बौद्धार्थविषयेपरमार्थसारग्रन्थे के के विषयाः उपनिबद्धाः सन्ति तस्य चर्चा अत्र विद्यते।

श्रीमदादिशेषप्रणीतः परमार्थसार गन्थः अद्वैतवेदान्त दर्शनस्य प्रमुखः ग्रन्थोऽस्ति, अद्वैत परमार्थस्य सारोऽस्मिन् परमार्थसारे ब्रह्मजीवमायादि विषये वर्णनं विद्यते।

परमार्थसारग्रन्थस्य मङ्गलाचरणे तु लिखितम् अस्ति–

अमल कमलमध्ये सन्निविष्टाङ्गयष्टिः।
कर जलरूहराजत्पुस्तकाक्षालिमाला।
अखिलनिगमसारः सर्वभूतान्तरस्था।
भवतु भवभयानां भेदेनी भारती नः।।[4],

ग्रन्थेऽस्मिन् बौद्धार्थस्य बहवः दृष्टान्तः परीलक्ष्यन्ते, ग्रन्थयान्तिमपद्याद् जगदाधारः जगतामाधारभूत शेष अनन्तस्तु, न य कोऽपि विपश्चिद् इति व्याख्यातृविवरणाच्यास्य प्रणीता भगवान् आदिशेष इति अवगम्यते। बौद्धार्थस्य विषये न्यायदर्शनसिद्धान्ते भाष्य विरोधे उक्तम्– 'इदं रजतम्' इत्यादि स्थले रजताद्याकारान्तकरणस्य परिणामात् एव निर्वाहः उचितः अस्ति। अतः स्त्रियाम्' इति सूत्रे भाष्यकारः खट्वादि पदार्थे स्तनकेशादेः अदर्शनात् स्त्रीलिङ्गस्य स्त्रीत्वलिङ्गस्य अभावस्य ज्ञान कारणात् टाप् प्रत्ययः न भवितुमर्हति। एवं प्रकारेण शंकां कृत्वा 'असत्तु मृगतृष्णावद् गन्धर्वनगरं यथा' इति सूत्रेण समाधानं कृतम्। अस्य आशयः एवमस्ति यत् खट्वा एवं वृक्षस्य स्त्रीत्वं, पुँस्त्वं रूपं यद्यपि अविद्यमानं विद्यते, असत् विद्यते, अस्यां दशायां तत् असत् लिङ्गं कथं ज्ञायते? मृगतृष्णवत्– उक्तं च परमार्थसारे–

"मृगतृष्णायामुदकं, शुक्तौ रजतं, भुजङ्गमो रज्ज्वाम्।
तैमिरिकचन्द्रयुगवद् भ्रान्तमखिलं जगद्रूपम्।।"[5]

अर्थात् यथा मृगः पिपासुः भुत्वा जलधाराम् पश्यति, परन्तु यदा सः तत्र गच्छति तत्र जलं नास्ति इति जानाति। अस्य भाष्यस्य कथनेन भ्रमस्य विषय शुक्तौ रजतस्य भानं भवति। न्यायदर्शनं तु हट्कादौ स्थित रजतस्य भानं कृत्वा भाष्यात् विपरितमुच्यते। अतः सर्वत्र बौद्धपदार्थस्य ही बाह्यभानं भवति, एवं शाब्दिकाः सिद्धांत प्रतिपादयति। यः आचार्येण भतृहरिणाऽपि समर्थितः– यथा मृगतृष्णायां जलस्य भ्रान्ति भवति, यदि जलाभावे जलस्य आभासः भवति, तर्हि शशविषाणस्य अभावेऽपि तस्याभासः प्रसक्तः भविष्यति,

अस्यां स्थितौ कथ्यते– जलस्य उपलब्धेः अनुकूल बींज अर्थात् अचिन्त्य सामर्थ्य रूपं निमित्तेन असदपि जलस्य भ्रान्ति भविष्यति। अत्र पूर्व–पूर्व मिथ्याज्ञानजन्य वासनां बींज कथ्यते। अपरं×च–

त्रिगुणा चैतन्यात्मनि सर्वगतेऽवस्थितेऽखिलाधरे।
कुरुते सृष्टिमविद्या सर्वात्मा स्पृश्यते तथा नात्मा।।[6]

अर्थात्– परमार्थसारेऽपि सृष्टिं प्रातिभासिकमेव उच्यते– यथा– त्रिगुणा अर्थात् सत्त्व–रजस्तमो रुपि गुणाः, अविद्या सृष्टिभ्रमं कुरुते अर्थात् जनयति, कुत्र जनयति? इति प्रश्ने उत्तरयति अखिलाधरे–समस्तप्रपंचाधिष्ठाने सर्वगते अर्थात् पूर्णेऽपरिछिनो नित्ये अवस्थिते, अर्थात् त्रिगुणा सर्वात्मा सर्वशक्तिफमयी अविद्या निखिले संसारे व्यापकरुपेण स्थित्वा चैतन्यात्मनि अधिष्ठानरुपेण स्थित्वा सृष्टेः भ्रमं करोति।

अत्र भ्रमविषय एव सृष्टिर्न तु सत्वं तस्याः इति इत्यर्थः।

तत्रैव अपरे श्लोके भ्रम निवारणाय–

''रज्ज्वां भुजङ्गहेतौ प्रभवविनाशौ यथा न स्तः। जगदुत्पत्ति विनाशे न च कारणमस्ति तद्वदिह।।

अर्थात्– रज्ज्वां भुजङ्गभ्रम हेतौ उत्पत्तिविनाशौ यथा न स्तो भुजङ्गस्यैवाभावात्, तद्वत् इह परमार्थ विचारे जगत उत्पत्तिविनाशयोः न किंचित्कारणमस्ति। कारणत्वमपि भ्रमविषय एव सत्यत्वादौ इति भावः। भ्रमविषयकारणत्वमेव ''यतो वा इमानि भूतानि'' [7] इति श्रुत्यादयोऽनुवदन्तीति न तद् विरोधः। सिंहावलोकनन्यायेन तत्र दोषान्तरमाह–अनिर्वचनीयोत्पत्तौ घटादिना मृदादेरिव ब्रह्मणोऽपि विकारित्वापत्तिः। भ्रमविषयेण तु न विकारित्वम्। यथा– कश्चित् कामुकः कान्ता विषयिणी नानाविध भ्रमं करोति कथयति च–

''सुप्ता किं नु मृता न किं मनसि मे
लीना विलीना नु किम्।''

इत्यादि कल्पनायाः कान्तयां कोऽपि विकारो न जायते तथैव मृत्तिकायां घटादिविकारोऽपि भ्रम एव। न तु कोऽपि पदार्थ इति ''तदनन्यत्वम्'' [8] इति सूत्रे स्पष्टीकृतम्।
अपरं×च– बौद्धपदार्थवादीनां मते यत् बुद्धिस्थमस्ति तदेव प्रातिमासिकमस्ति, यत् बहिरस्ति तत् व्यवहारिकमस्ति। यथा शशश्रृङ्ग बुद्धिस्थमात्रवशात् प्रातिभासिकमस्ति परन्तु वृक्ष–पवर्त–घटादि बुद्धौ सत्वापि बहिरपि विद्यमानमस्ति अतः ते व्यावहारिकं विद्यन्ते। अस्य भेदस्य स्पष्टिकरणार्थं परमार्थसार श्लोके कथयति–

''ज्वलनाद् धूमोद्गतिर्भिविविधऽकृतिरम्बरे यथा भाति।
तद्वद्विष्णो सृष्टिः स्वमायया द्वतविस्ताराभाति।।'' [9]

अर्थात्– यथा ज्वलन हेतुकधूमोद्गमनेन नानाविध आकृतिः नीलश्वेतादिरुपा अम्बरे पुरोवर्त्याकाशेऽसत्यपि यथा भाति तथैव विष्णौ सृष्टिद्वैतविस्तरा नामरूपादिविस्तरा सत्वस्थिरत्वादिरुपेण भाति। अत्र पुनः शास्त्रस्य प्रचयगमनादि फलाय स्वेष्टदेवता प्रमाणरूपं मङ्गलमाचरन् परमार्थसाराख्यं ग्रन्थं वक्तुं प्रतिजानिते–

सत्यमिव जगदसत्यं मूलप्रकृतेरिदं कृतं येन।
तं प्रणिपत्योपेन्द्रं वक्ष्ये परमार्थसारमिदम्।। [10]

अपरं×च–

प्राणाद्यनन्तभेदैरात्मानं संवितत्येन्द्रजालमिव।
संहरति वासुदेवः स्वविभूत्या क्रीड़मान इव।। [11]

अत्र मूलप्रकृते इत्यत्र मयूरव्यंसकादित्वात् समासः, ल्यब्लोपे पंचमी तां स्थूलविद्यायाः कारणभूतां तादृशवासनारूपामवलम्ब्य। एतेन वाक्येन वचस्पति मिश्रोक्तव्याख्यानम् अपास्तम्, अर्थात् मूलप्रकृतेः असत्यं जगत् येन सत्यमिव कृतं तम् उपेन्द्रं प्रणिपत्येदं परमार्थसारम् वक्ष्येत्यर्थः।
अपरंच येन उपन्द्रेण वासुदेवेन इदं भ्रमात्मकं ज्ञानविषयं विकल्पात्मकं ज्ञानविषयं वा जगत्सत्यमसदपि स्वसत्तया सत्यमिव कृतम् तं प्रणम्य परमार्थसारं ग्रन्थं वक्ष्ये। अर्थात् एतत् सर्वं भगवतः सङ्कल्प मात्रेण अनुपपन्नम्।
''मायां तु प्रकृतिं विद्यात्'' इत्यादि श्रुति प्रमाणम्। पुनरत्र अविद्यया आवश्यकत्वे वासुदेवः किमर्थस्तत्राह–प्राणाद्यनन्त भेदैः इति, प्राणादि अर्थात् सृज्यस्रष्टृपाल्यपालकसंहर्तृसंहार्यतत्साधनादि, तद्रूपै रनन्तभेदैरात्मानं स्वस्वरूपं सङ्प्तिविस्तारेण परिकल्प्य पुनः तद्दर्शनमुपसंहरति, यथा ऐन्द्रजालिकः मन्त्रादि माध्यमेन स्वशक्तिभिः आत्मानमेव अजतुरगादिरूपेण दर्शयित्वा पुनः संहरति तद्वत् वासुदेवः लीलया प्राणादि भेदेन आत्मानम् इन्द्रजालामिव संवितति संहरति च, एतेन असतो भाने बौद्धमतं निराकरोति। तत्र आरोपितसत्वस्यापि अनङ्गीकारात्।
यदि बौद्धमते स्वीकृतात्मानः अनित्यत्वेव परमार्थसारस्य मते अमन्यत तदा ग्रन्थकारः परमार्थसारस्य आत्मनित्यत्ववादी मतमुपस्थापयति– यथा–

अमलः सकृद्विभातश्चैतन्यात्मा खवद्वयापी।
सर्वविकल्पहीनः शुद्धो बुद्धोऽजरोमरः शान्तः।।

अर्थात्– न विद्यते मलमज्ञानकार्यलक्षणं यस्य सः अमलः, विकल्पयन्ते यैस्ते विकल्पना विशेषा नामरूपास्तैहीनः सर्वविकल्पहीनः, शुद्धः पापरहितः, बुद्धः–बौधस्वरूपः अजरोऽमरः अर्थात्– विकाररहितत्वात्, शान्तः निष्प्रपंचः खवद्व्यापी अर्थात् तद्वदपरिच्छिन्नः इत्यर्थः। अर्थात् आत्माअमलः सदाप्रकाशस्वरूपः, चैतन्यरूपः, आकाशवद्व्यापकः सर्वपापरहितः, बोधस्वरूपः, अजरः, अमरः, निष्प्रपंच्च। अत्र विकल्पन पदेन केवलं नाम रूपस्य ग्रहणं न। अपितु सर्वविकल्पन पदेन उत्पत्तिख विनाशादेः अपि ग्रहणम् उपलक्षणतया भवेत्। ईश्वरः सत्यसङ्कल्पवान् अस्ति यः सङ्कल्पं करोति, तेनैव प्रकारेण फलितं भविष्यति। सृष्टेः आरम्भकाले तस्य परमात्मनः एवं सङ्कल्पं भवति, अथवा तत्तद्विषयस्य भ्रमे तत्तत्सामग्रेः भ्रमः कारणं भवति, एवं स्वीकृत्य भ्रमगत यः कार्याकारणभावः, तस्य भ्रमस्य विषये अनादिवासनायाः कारणम् आरोपितत्वात् उत्पत्तिविनाशः स्वीकरोति। अतः अव्यक्तपदवाच्य सूक्ष्माविद्याऽपि जन्या एव। प्रलयकालान्तरे पूर्वेव प्रपंचस्य जननी भवति पुनः यावत् सृष्टि स्थास्यति तावदेव तस्य नित्यता स्थास्यति, कालत्रयाबाधितत्वरूप नित्यत्वं न स्वीकुर्वन्ति।
अविद्याम् अजन्यं नित्यं स्वीकारे युक्तिविरुद्धः भवति, अस्य प्रतिपादनं एवं भवति यथा– सर्वज्ञ सर्वशक्तिमान् ब्रह्मः जगतः उत्पत्तेः, स्थितिः, प्रलयस्य कारणं भवति, एतद् वेदान्तवाक्यात् एव ज्ञायते, अस्य समर्थनं 'समन्वयात्', इत्यादि वचनैः प्रतिपादितम्, 'जन्यत्वनाश्यत्वयोः समव्याप्तेः' अर्थात् यः पदार्थः जन्यः भवति तस्य विनाशः अवश्यं भविष्यति, अपरं च यः विनाशं भवति तस्य जननं भवत्येव। एते परस्परं व्याप्यव्यापकाभावः। यदि मोक्षसाध्य वेदान्तिनां मते नित्यमस्ति, तर्हि अविद्यायाः जन्यत्वे का हानिरिति। तस्य निवारणाय– परमार्थसारग्रन्थे–

रज्ज्वां नास्ति भुजङ्गः सर्पभयं भवति हेतुना केन।
तद्वद् द्वैतविकल्पभ्रान्तिरविद्या न सत्यमिदम्। [12]

अर्थात्–

कालत्रयेऽपि रज्जुः सर्पो न भवति, कदाचित् तद्दर्शनाद्भयं भवति, तत् केन हेतुना? भ्रमरूपाविद्ययेति। अर्थात्– भ्रमरूपाविद्यया चेत् तद्वद् आत्मनि द्वैत विकल्पभ्रान्तिः विज्ञानात् अन्तर्याम्यात् भ्रान्तिः अविद्या नै तत् सत्यमित्यर्थः। पुनः तस्य निराकरणाय तत्रैव–

एतत्तदन्धकारं यदनात्मन्यात्मताभ्रान्त्या।
न विदन्ति वासुदेवं सर्वात्मानं जना मूढाः।। [13]

अर्थात्–
रज्ज्वां भुजङ्ग भयं कदा भवति यदा अन्धकारं भवति, यदनात्मन्यतात्मताभ्रान्ति भवति तदा सर्वस्वरूपं वासुदेवं परमात्मानं न विदन्ति, तथा च श्रुतिरपि कथयति–

''मयां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्'' इति।

अर्थात्–
सनत्सुजातभाष्येऽपि आचार्येण उक्तम्– ''अग्रहणान्यथा ग्रहणात्मिका अविद्या' इति। इयं स्थूलविद्या अग्रहणजनकान्यथाग्रहणस्वरूपेति। अनेन सिद्धयति यत्– अविद्या भ्रमरूपा तज्जनकस्य संस्काररूपोऽस्ति। अत एव ब्रह्मैव नित्यं सर्वकारणस्य जनकः। एक विज्ञानेन सर्वविज्ञानं श्रुतिसम्मत प्रतिज्ञाभङ्गः।
पुनः पूर्वोक्त विषये परमार्थसारस्य प्रमाणं प्रस्तौति–

हिमफेनबुद्बुदा इव जलस्य धूर्माद्गमो यथा वह्नेः।
तद्वत्स्वभावभूता मायैषा कीर्तिता विष्णोः।
एनां द्वैतविकल्पभ्रमस्वरूपां विमोहिनीं मायाम्। इति।

अर्थात्–
हिमादयो यथा जलस्य स्वभावाः जलेन सम्बन्धाः, धूमोद्गमहेतुता यथा वह्नेः स्वभावस्तद्वत् विष्णोर्माया विष्णुस्वभावभूता तद्विषयभ्रमजनिकां जीवान् विमोहयन्तिम्।

तदुक्तं तत्रैव–

विमोहयतीवात्मानं स्वमायया द्वैतरूपया देव। इति।

अर्थात्–
द्वैतं नामरूपे तदेव स्वरूपं यस्यास्तया स्वमायया, आत्मानम्– उपाध्यवच्छिन्नम् आत्मानं जीवादिकं मिथ्याज्ञानं करोति, तेन च स्वस्वरूपाज्ञानं तेषामुपलभ्यते। स्वयमेव गुहायां पुरुषमात्मानमित्यस्योत्तरार्द्धं बोध्यम्।
अनेन प्रकारेण परमार्थसार ग्रन्थे बौद्धार्थः अङ्गीकृतो वर्तते, अतएव नागेशोऽपि सग्रन्थः महतादरेण बौद्धार्थ स्थापनायाम् समादृतः मन्ये एतेन दिग्दर्शनेन छात्राणां अध्येतृणां च साहाय्यं भविष्यति।

**सन्दर्भ**


1. व्या.म.पस्पशाह्निकम्– पृ. 55
2. वा.प.ब्र.का.कारिका–30
3. व्या.महा.प्रदीपः पस्पशाह्निके, पृ. 62
4. परमार्थसार ग्रन्थ मङ्गलाचरणे
5. पारमार्थसार ग्रन्थ पृ. 11
6. परमार्थसार ग्रन्थ–पृ. 25
7. तैतरियोपनिषद्.– 3. 1. 3
8. ब्रह्मसूत्र.सं. – 2. 1. 14
9. परमार्थसार ग्रन्थ–पृ.सं. 19
10. परमार्थसार ग्रन्थ–पृ.सं. 6
11. परमार्थसार ग्रन्थ–पृ.सं. 18
12. परमार्थसार ग्रन्थ–पृ.सं. 17
13. परमार्थसार ग्रन्थ–पृ.सं. 17